course with a forbidden person स्वप्नेऽप्यगम्यागमनः···नरकं च विशति BrahmVaiP. iv. 77.17; अगम्यागमनो यो वै···सोऽपि पूतो भवत्याशु सद्यः पादाम्बुधारणात् SkandP. ii(5). 10.42; पुण्ये त्वगम्यागमना गतार्ता प्रजावती दुःप्रतिभान्विता सा VasiS. 24.12.

**अगम्यागमनकारिन्** ( agamyāgamana–kārin ) *adj.* one having intercourse with a forbidden woman हिंसाभक्ष्यभक्षणस्तेयागम्यागमनकारिणाम्··· विशुद्धिरुक्ता ManvaMu. 486.16 (*on* 11.179)

**अगम्यागमनदोष** ( agamyāgamana–doṣa ) *m.* sin of illicit intercourse पुत्रिकागमनेऽगम्यागमनदोषाभावात् Mitā. 476.27 (*on* 3.280)

**अगम्यागमननिमित्त** ( agamyāgamana–nimitta ) *adj.* caused or incurred by illicit intercourse (पापम्) अगम्यागमननिमित्तम्···निर्हरेत् ManvaMu. 484.19 (*on* 11.169)

**अगम्यागमनरूप** ( agamyāgamana–rūpa ) *adj.* having the nature of illicit intercourse प्रजापतेस्तावत् । ··· अगम्यागमनरूपादधर्माचरणाद्ब्रह्मैव्यतिक्रमः TantraVā. 127.22 (*on* i. 3.7)

**अगम्यागमनसंबन्धिन्** ( agamyāgamana–sambandhin ) *adj.* pertaining to illicit intercourse अगम्यागमनीयं महापातकेतरागम्यागमनसंबन्धि ManvaVi. 1428.9 (*on* 11.169)

**अगम्यागमनान्तरीयकत्व** ( agamyāgamanāntarīyaka–tva ) *n.* inclusion in illicit intercourse ननु ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्यागमनान्तरीयकत्वं नास्त्येव Mitā. 476.26 (*on* 3.280); न चात्रागम्यागमनप्रायश्चित्तं पृथक्कर्तव्यम् ; ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्यागमने(?)नान्तरीयकत्वात् Mitā. 476.17 (*on* 3.280); 477.6 (*on* 3.280)

**अगम्यागमनीय** ( agamyāgamanīya ) *adj.* (sin) relating to or caused by illicit intercourse पापम् ··· अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ManuSm. 11.169 = MatsyaP. 227.48; ManvaVi. 1428.9 (*on* 11.169)

**अगम्यागमनेच्छा** ( agamyāgamanecchā ) *f.* desire for illicit intercourse अगम्यागमनेच्छा ते भविष्यति PañcaRā.(Nā.) i. 10.31.

**अगम्यागमनोद्भव** ( agamyāgamanodbhava ) *adj.* [ *f.* –ā ] resulting from illicit intercourse मुच्यते पातकैः सर्वैरगम्यागमनोद्भवैः SkandP. v(3). 92.12; आरामस्थतरुच्छेदमगम्यागमनोद्भवम् । (पापं विलयं याति कन्यादानेन) SkandP. v(3). 98.29; स मुक्तः पातकैः सर्वैरगम्यागमनोद्भवैः VāmaP. 49.36; ब्रह्महत्या गता तस्य अगम्यागमनोद्भवा PadmP. ii. 91.8.

**अगम्यागमिन्** (agamyā–gamin) *adj.* who has illicit intercourse, who commits adultery अगम्यागमी ( v. l. °गामी ) दुश्चर्मा···तस्मात् प्रायश्चित्तं चरेदात्मविशुद्धये Kāśyapadharmaśāstra in JOR (Madras) 1939 vol. xiii. part IV. 278.7.

**अगम्यागम्य(?म)कोटि** ( agamyāgamya(?ma–)–koṭi ) *m. f.* a crore of illicit intercourses (i. e. sin incurred thereby) कोटयो ब्रह्महत्यानामगम्यागम्य( ? म )कोटयः।···क्षणाद्भस्मीभवन्त्येव शैवे पञ्चाक्षरे धृते SkandP. iii(3). 1.66.

**अगम्यागामिता** ( agamyāgāmi–tā ) *f.* (habitual) commitment of illicit intercourse, the state of having illicit intercourse अगम्यागामिता यत्र तं देशं परिवर्जयेत् BṛParāSm. 1.46; विक्रयं मद्यमांसानाम्··· । अगम्यागामिता चौर्यं शूद्रे स्युः पापहेतवः BṛParāSm. 4.228.

**अगम्यागामित्व** (agamyāgāmi–tva) *n.* indulgence in illicit intercourse विच्छिन्नाभिरिति । छेदयुक्ताभिर्लेखाभिर्नवत्यायुरगम्यागामित्वं च VīraMi.(Lakṣaṇa.) 22.20.

**अगम्यागामिन्** ( agamyā–gāmin ) *adj.* perpetrator of illicit intercourse, approaching (i. e. having intercourse with) a woman prohibited for intercourse कुण्डाशिसोमविक्रय्यगारदाहि° ··· अगम्यागामि° ··· वादित्रतालनृत्यगीतशीलान् (न भोजयेत्) GautDS. ii. 6.18 ( comm. समानप्रवरस्त्रीगामी ) ; ब्रह्महा गुरुतल्पी वागम्यागामी···प्राणायामशतं कृत्वा···मुच्यते सर्वकिल्बिषैः AtriSm. 8.11; अगम्यागामिनश्चास्ति दण्डो राज्ञा प्रचोदितः NāraSm. 183.77; अगम्यागामिनो ये च ह्यभक्ष्यस्य च भक्षकाः । ते मां प्राप्य विमुच्यन्ते पापसंघैः सुसंचितैः SkandP. v(3). 178.11; अगम्यागामिनः सर्वे महापातकिभिः समाः ViṣṇuDhaP. ii. 111.13; ii. 118.1; पापं यद्दर्शने तात कथयामि निशामय ।···अगम्यागामिनं दुष्टं चतुर्वर्णे नराधमम् BrahmVaiP. iv. 78.51; येऽगम्यागामिनो मूढाः परद्रव्यापहारिणः (दक्षिणेन तु ते सर्वे द्वारेण प्रविशन्ति वै) (यमपुरीम्) BrahmP. 214.124; 215.75; अगम्यागामिनो ज्ञेया विषमाभिर्न संशयः । ऋजुभिर्वसुभोगी स्यात् परदारविनिन्दकः BhaviP. 57A.24 (i. 26.10); अदीक्षितद्विजानां च यदन्नं शवदाहिनाम् । अगम्यागामिनां चैव द्विजानामन्नमेव च । ··· एते सर्वे विशुध्यन्ति विष्णोर्नैवेद्यभक्षणात् DevīBhāP. ix. 40.35; अगम्यागामिनो ये च सुरविप्रस्वहारिणः । अतिपातकिनश्चैते वेदविद्भिः प्रकीर्तिताः PañcaRā.(Nā.) i. 10.78; वेददूषयिता यश्च वेदविक्रयिकश्च यः। अगम्यागामी यश्च स्यात् ते यान्ति शबलाभिधम् (नरकम्) BṛBrahmaS. ii. 3.65; अगम्याः परस्त्रियो गच्छतीति 'अगम्यागामी' CaturCin. iii(1). 487.10.

**अगम्याङ्गनासंगम** ( agamyāṅganā–saṁgama ) *m.* intercourse with a prohibited woman दोषानपि गुणान् मेने कलशः कलुषीकृतः । नर्म ह्रेपणकारि वाक्यमुचितं क्रूरं प्रजापीडनं तेजस्वित्वमलज्जता सरसतागम्याङ्गनासंगमः RājTa.(Ka.) 7.304.

**अगम्यात्मन्** ( agamyātman ) *m.* one of the names of Jina (*lit.* whose nature is incomprehensible) नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये ।···अध्यात्मगम्योऽगम्यात्मा योगविद् योगिवन्दितः MahāP. 25.188.

**अगम्यात्वज्ञानोत्पाद** ( agamyātvajñānotpāda ) *m.* origin of the knowledge of (some woman) being prohibited for intercourse शकुन्तलादावगम्यात्वज्ञानोत्पादस्तु स्वात्मनि दुष्यन्ताद्यमेदबुद्धया प्रतिबध्यते RasGaṅ. 32.10.

**अगम्यादिगमन** ( agamyādi–gamana ) *n.* intercourse with a woman prohibited for intercourse or similar other woman स्वप्नावस्थायामगम्यादिगमनादधर्मोत्पत्तिर्न भवति NyāyVār. 528.7 (*on* iv. 2.34)

**अगम्यानिरत** (agamyā–nirata) *adj.* attached or addicted to a woman prohibited for intercourse ब्रह्मघ्नौ देवशार्दूल पक्वमृत्सदृशौ पदौ । पीतावगम्यानिरतौ कृष्णौ पानरतौ सदा BhaviP. 54B.24 (i. 24.21)

**अगम्यानुभाव** ( agamyānubhāva ) *adj.* whose lustre or prowess is unfathomable, having unimaginable prowess or greatness नृसिंहक्षेत्रमुपगम्यागम्यानुभावो भगवन्तं नृसिंहं दृष्ट्वा स्तुत्वा प्रणम्य प्रदक्षिणीकृत्य प्रतस्थे CaitCa. 161.17.

**अगम्याभिकाम** ( agamyābhikāma ) *adj.* [ *f.* –ā ] hankering after the unattainable or unapproachable (woman) विमुखीष्वन्यकामासु यद्रामास्वधिका रुचिः । सा ह्यगम्याभिकामस्य कामं कामस्य वामता RāmāMañ. 253.16.

**अगम्याभिगामिन्** ( agamyābhigāmin ) *adj.* perpetrator of illicit intercourse गृहक्षेत्राभिहर्तारस्तथागम्याभिगामिनः ।···एते हि कथिता लोके धर्मज्ञैराततायिनः MatsyaP. 227.117; विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः BṛSaṁ. 68.25.

**अगम्यार्थम्** ( agamyārtham ) *adv.* for the sake of the woman not fit to be approached (i. e. prohibited for intercourse) अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः । शम्भलीमुक्तसर्वस्वा जना यत्पारिपार्श्विकाः NaiṣC. 17.15 ( comm. गन्तुमशक्यानामनर्हाणां राज्ञ्यादीनां मात्रादीनां च संभोगार्थं तृणमिवानायासत्याज्याः प्राणा येषां ते )

**अगम्याश्रममण्डित** ( agamyāśrama–maṇḍita ) *adj.* adorned by inaccessible hermitages भवद्भिर्दृश्यताम् ··· । स पाण्ड्यविषयः श्रीमानगम्याश्रममण्डितः RāmāMañ. 206.20.

**अगम्यास्त्रीनिषेवण** ( agamyāstrī–niṣevaṇa ) *n.* intercourse with an unapproachable (i. e. prohibited) woman अनाहिताग्निता स्तेयमगम्यास्त्रीनिषेवणम् । ···उपपातकम् ViṣṇuDhaP. ii. 73.63.

**अगय** ( agaya– ) [ *denom.* fr. *aga* ] to strike with a hill क्वचन शक्तयतासयतापि च द्रवयतागयतेति वदावदम् । ···अभूत् प्रधनं कपिरक्षसाम् Rāgh. 19.31.

**अगर** ( agara ) *m. n.* **i** *Agallochum* अगरं( ? रुं ) गुग्गुलुं चैव कर्पूरं तगरं त्वचा । एकैकं निर्वपेद्धूपम् SkandP. vi. 265.16; **ii** a kind of weapon ( संचयश्चात्र सर्वेषां चायुधानां प्रशस्यते ) अगरस्य च संश्रयम् ViṣṇuDhaP. ii. 26.33; *m.* **i** name of a son of Danu ( चत्वारिंशद्दनोः पुत्राः ··· ) इसृपा एकचक्रश्च विरूपाक्षो हराहरौ ( v. l. गरागरौ ) MahāBhā. i. 59.25; **ii** one of the 12 meanings of the syllable *ṣṭa* ष्टः षष्ठोऽनुस्वरोऽङ्गारोऽथासुरोऽसुरसत्तमः । गोविन्दो गरुडो गण्डो घासोऽगारोऽगरोऽमरः DvyakṣaNā. 2.110.

**अगरा** ( agarā ) *f.* name of a village (near Jabbulpore, called Agaria) cf. Chitrava, Prāchīnasthalakośa p. 5; आत्मनश्च पुण्याभिवृद्धये अखरौदसमीपे अगराग्रामः···दामोदरपुत्राय पंडितश्रीदेल्हणशर्मणे···प्रदत्तः EI. xxi. 95.27.

**अगराज** ( aga–rāja ) *m.* the king of mountains, the Himālayas दानवर्षी कृताशंसो नागराज इवाबभौ Kirātā. 15.45 (Malli. अगराजो हिमवान्); वैदेहि पुष्पकारूढा विहर स्वेच्छया जगत् । शिखराण्यगराजस्य···पश्यन्ती PadmP.(Ra.) 72.41; अगराजं स जवादवाप दैत्यः Surath. 8.77; YātrāPra. 3.154; नागराग( ? ज )प्रथात्यक्तो गिरीशो जयतादसौ ĪśvaS. 39 ( comm. अगराजप्रथात्यक्तः पर्वतराज इव )

**अगराजकन्यका** ( agarāja–kanyakā ) *f.* daughter of Himālaya ( i. e. Pārvatī ) यश्च···( ? अ )तिवेलकलितसपर्याभिप्रीणदगराजकन्यकाप्रणयिनम् YātrāPra. 2.92(4)

**अगराजनन्दना** ( agarāja–nandanā ) *f.* daughter of Himālaya (i. e. Pārvatī) अनन्तरम्···अगराजनन्दनामभिवन्द्य···वाचमेवमवोचत YātrāPra. 1.63(2)

**अगराजन्य** ( aga–rājanya ) *m.* king of the mountains (i. e. Himālaya )